श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमात्स्ये महापुराणे वराहप्रादुर्भावो नामाष्टचत्वारिंशदधिकद्विशततमोऽध्याये

# ॥ श्री माधवीयस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री माधवीयस्तोत्रम् ॥

पृथिव्युवाच

त्रिविक्रमायामितविक्रमाय
    महावराहाय सुरोत्तमाय।
श्रीशार्ङ्गचक्रासिगदाधराय
    नमोऽस्तु ते देववर प्रसीद ॥ 1 ॥

तव देहाज्जगज्जातं पुष्करद्वीपमुत्थितम्।
ब्रह्माणमिह लोकानां भूतानां शाश्वतं विदुः ॥ 2 ॥

तव प्रसादाद् देवोऽयं दिवं भुङ्क्ते पुरन्दरः।
तव क्रोधाद्धि बलवान् जनार्दन जितो बलिः ॥ 3 ॥

धाता विधाता संहर्ता त्वयि सर्वं प्रतिष्ठितम्।
मनुः कृतान्तोऽधिपतिर्ज्वलनः पवनो घनः ॥ 4 ॥

वर्णाश्चाश्रमधर्माश्च सागरास्तरवोऽचलाः।
नद्यो धर्मश्च कामश्च यज्ञा यज्ञस्य च क्रियाः ॥ 5 ॥

विद्या वेद्यं च सत्त्वं च ह्रीः श्रीः कीर्तिर्धृतिः क्षमा।
पुराणं वेदवेदाङ्गं साङ्ख्ययोगौ भवाभवौ ॥ 6 ॥

जङ्गमं स्थावरं चैव भविष्यं च भवच्च यत्।
सर्वं तच्च त्रिलोकेषु प्रभावोपहितं तव ॥ 7 ॥

त्रिदशोदारफलदः स्वर्गस्त्रीचारुपल्लवः।
सर्वलोकमनःकान्तः सर्वसत्त्वमनोहरः॥ 8 ॥

विमानानेकविटपस्तोयदाम्बुमधुस्रवः।
दिव्यलोकमहास्कन्धः सत्यलोकप्रशाखवान्॥ 9 ॥

सागराकारनिर्यासो रसातलजलाश्रयः।
नागेन्द्रपादपोपेतो जन्तुपक्षिनिषेवितः॥ 10 ॥

शीलाचारार्यगन्धस्त्वं सर्वलोकमयोद्रुमः।
द्वादशार्कमयद्वीपो रुद्रैकादशपत्तनः॥ 11 ॥

वस्वष्टाचलसंयुक्तस्त्रैलोक्याम्भोमहोदधिः।
सिद्धसाध्योर्मिकलिलः सुपर्णानिलसेवितः॥ 12 ॥

दैत्यलोकमहाग्राहो रक्षोरगझषाकुलः।
पितामहमहाधैर्यः स्वर्गस्त्रीरत्नभूषितः॥ 13 ॥

धीश्रीह्रीकान्तिभिर्नित्यं नदीभिरुपशोभितः।
कालयोगमहापर्वप्रयागगतिवेगवान्॥ 14 ॥

त्वं स्वयोगमहावीर्यो नारायण महार्णवः।
कालो भूत्वा प्रसन्नाभिरद्भिर्ह्लादयसे पुनः॥ 15 ॥

त्वया सृष्टास्त्रयो लोकास्त्वयैव प्रतिसंहृताः।
विशन्ति योगिनः सर्वे त्वामेव प्रतियोजिताः॥ 16 ॥

युगे युगे युगान्ताग्निः कालमेघो युगे युगे।
मम भारावताराय देव त्वं हि युगे युगे॥ 17 ॥

त्वं हि शुक्लः कृतयुगे त्रेतायां चम्पकप्रभः।
द्वापरे रक्तसङ्काशः कृष्णः कलियुगे भवान्॥ 18 ॥

वैवर्ण्यमभिधत्से त्वं प्राप्तेषु युगसन्धिषु।
वैवर्ण्यं सर्वधर्माणामुत्पादयसि वेदवित्॥ **19**॥

भासि वासि प्रतपसि त्वं च पासि विचेष्टसे।
क्रुद्ध्यसि क्षान्तिमायासि त्वं दीपयसि वर्षसि॥ **20**॥

त्वं हास्यसि न निर्यासि निवार्पयसि जाग्रसि।
निःशेषयसि भूतानि कालो भूत्वा युगक्षये॥ **21**॥

शेषमात्मानमालोक्य विशेषयसि त्वं पुनः।
युगान्ताग्न्यवलीढेषु सर्वभूतेषु किञ्चन॥ **22**॥

यातेषु शेषो भवसि तस्माच्छेषोऽसि कीर्तितः।
च्यवनोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु॥ **23**॥

यस्मान्न च्यवसे स्थानात् तस्मात् सङ्कीर्त्यसेऽच्युतः।
ब्रह्माणमिन्द्रं च यमं रुद्रं वरुणमेव च॥ **24**॥

निगृह्य हरसे यस्माद् तस्माद्धरिरिहोच्यसे।
सन्तानयसि भूतानि वपुषा यशसा श्रिया॥ **25**॥

परेण वपुषा देव तस्माच्चासि सनातनः।
यस्माद् ब्रह्मादयो देवा मुनयश्चोग्रतेजसः॥ **26**॥

न तेऽन्तं त्वधिगच्छन्ति तेनानन्तस्त्वमुच्यसे।
न क्षीयसे न क्षरसे कल्पकोटिशतैरपि॥ **27**॥

तस्मात् त्वमक्षरत्वाच्च अक्षरश्च प्रकीर्तितः।
विष्टब्धं यत्त्वया सर्वं जगत्स्थावरजङ्गमम्॥ **28**॥

जगद्विष्टम्भनाच्चैव विष्णुरेवेति कीर्त्यसे।
विष्टभ्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम्॥ **29**॥

यक्षगन्धर्वनगरं सुमहद्भूतपन्नगम्।
व्याप्तं त्वयैव विशता त्रैलोक्यं सचराचरम्॥ 30॥

तस्माद् विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा।
नारा इत्युच्यते ह्यापो ह्यृषिभिस्तत्त्वदर्शिभिः॥ 31॥

अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः।
युगे युगे प्रनष्टां गां विष्णो विन्दसि तत्त्वतः॥ 32॥

गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा।
हृषीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः॥ 33॥

ईशिता च त्वमेतेषां हृषीकेशस्तथोच्यसे।
वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये॥ 34॥

त्वं वा वससि भूतेषु वासुदेवस्तथोच्यसे।
सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः॥ 35॥

ततः सङ्कर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः।
प्रतिव्यूहेन तिष्ठन्ति सदेवासुरराक्षसाः॥ 36॥

प्रविद्युः सर्वधर्माणां प्रद्युम्नस्तेन चोच्यसे।
निरोद्धा विद्यते यस्मान्न ते भूतेषु कश्चन॥ 37॥

अनिरुद्धस्ततः प्रोक्तः पूर्वमेव महर्षिभिः।
यत् त्वया धार्यते विश्वं त्वया संह्रियते जगत्॥ 38॥

त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च।
यत् त्वया धार्यते किञ्चित् तेजसा च बलेन च॥ 39॥

मया हि धार्यते पश्चान्नाधृतं धारये त्वया।
न हि तद् विद्यते भूतं त्वया यन्नात्र धार्यते॥ 40॥

त्वमेव कुरुषे देव नारायण युगे युगे।
मम भारावतरणं जगतो हितकाम्यया॥ **41** ॥

तवैव तेजसाऽक्रान्तां रसातलतलं गताम्।
त्रायस्व मां सुरश्रेष्ठ त्वामेव शरणं गताम्॥ **42** ॥

दानवैः पीड्यमानाहं राक्षसैश्च दुरात्मभिः।
त्वामेव शरणं नित्यमुपयामि सनातनम्॥ **43** ॥

तावन्मेऽस्ति भयं देव यावन्न त्वां ककुद्मिनम्।
शरणं यामि मनसा शतशोऽप्युपलक्षये॥ **44** ॥

उपमानं न ते शक्ताः कर्तुं सेन्द्रा दिवौकसः।
तत्त्वं त्वमेव तत् वेत्सि निरुत्तरमतः परम्॥ **45** ॥

शौनक उवाच
ततः प्रीतः स भगवान् पृथिव्यै शार्ङ्गचक्रधृक्।
काममस्या यथाकाममभिपूरितवान् हरिः॥ **46** ॥

अब्रवीच्च महादेवी माधवीयं स्तवोत्तमम्।
धारयिष्यति यो मर्त्यो नास्ति तस्य पराभवः॥ **47** ॥

लोकान् निष्कल्मषांश्चैव वैष्णवान् प्रतिपत्स्यते।
एतदाश्चर्यसर्वस्वं माधवीयं स्तवोत्तमम्॥ **48** ॥

अधीतवेदः पुरुषो मुनिः प्रीतमना भवेत्॥ **49** ॥

॥ इति श्री माधवीयस्तोत्रं समाप्तम्॥